श्री तुलसी स्तवराजः

श्री तुलसी स्तवराजः

शौनकः --

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद |
ब्रूहि मे स्तवराजं तु तुलस्याः पुण्यवर्धनं ||1||

श्री सूतः --

साधु साधु महाभाग कृतः प्रश्नस्त्वयाऽनघ |
तुलस्याः स्तवराजं तु को नु वर्णयितुं क्षमः ||2||

इह लोके परत्रापि ब्रह्मणाऽपि न शक्यते |
तुलसीकाननं दृष्ट्वा यत्र कुत्रापि वै स्थले ||3||

स्मरणात्कीर्तनाद् ध्यानात् सर्वपापैः प्रमुच्यते |
किमुत स्तवराजेन स्तुवतो मुक्तिरस्य वै ||4||

भविशष्यतीति संदेहो रौरवं नरकं व्रजेत् |
तुलसीस्तवराजस्य छंदोऽनुष्टुप् प्रकीर्तितं |
ऋषिर्नारायणो देवो देवता श्रीरुदीरिता ||5||

श्रीरिति बीजं, तुमिति कीलकं, लमिति शक्तिः,
श्रीमिति दिग्बंधः | नम इति सर्वभूतोच्चाटनं ||

अंगन्यासः -

ॐ श्री हृदयाय नमः | ॐ तुं शिरसे स्वाहा |
ॐ लं शिखायै वषट् | ॐ स्यैं कवचाय हुं |
ॐ नं नेत्रत्रयाय वौषट्| ॐ मः अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः ||

ध्यानं -

चतुर्बाहुयुतां देवीं शंखपुस्तकधारिणीं |
पद्माक्षमालां पुष्पं च धारिणीं पुण्यदायिनीं ||6||

अमृताब्धिसमुत्पन्ने सर्वशोकविनाशिनी |
सर्वसौभाग्यदात्री(यी) त्वं तुलसि (सी) रक्षणं कुरु ||7||

दक्षिणे लोकविख्याते विष्णुधृतशरीरिणि |
विश्वरूपी विश्वकर्त्री तुलसी रक्षणं कुरु ||8||

सर्वलोकमये(यी) पूज्ये सर्वसंपत्प्रदायिनि |
सर्वतापप्रशमनि तुलसी रक्षणं कुरु ||9||

महिता लोकपूज्या च महिषासुरभंजनि |
करवीरपुरावासे तुलसी रक्षणं कुरु ||10||

मायावती भगवती महिला भद्रकालिका |
मोहिनी संगता शौरी तुलसी रक्षणं कुरु ||11||

महालक्ष्मि महाकाली सर्वत्र विजया जया |
अशरीरी शरीरी च तुलसी रक्षणं कुरु ||12||

ब्रह्माणी शंकरी सौम्या वैष्णवी च स्वधा तथा |
देवसेना महारौद्री तुलसी रक्षणं कुरु ||13||

चामुंडा चंचला भीमा रेणुका मारिका तथा |
पद्माक्षी पञ्ममाला च तुलसी रक्षणं कुरु ||14||

शुभाशुभप्रदात्री त्वं वृषभासुरभंजनी |
वंजुला जर्झरी क्रूरा तुलसी रक्षणं कुरु ||15||

अतिगुह्यतमं दिव्यं पुत्रपौत्रप्रवर्धनं |
नास्तिकाय प्रदेयं न नाभक्ताय कदाचन ||16||

शुश्रूषवे च भक्ताय प्रदेयं हितमिच्छता |
विष्णुभक्ताय पूज्याय वैराग्य गुणशालिने ||17||

भृगुवारे भौमवारे प्रदोषे च विशेषतः |
प्रभाते सर्वदा जप्यं लिखित्वा पुस्तकं यदि ||18||

स्थापितं पूजितं चेत्स्यात् सर्वरोगैः प्रमुच्यते |
महालक्ष्मीः सिंधुतीरे विष्णुना प्रभविष्णुना ||19||

साऽपि विधये प्रोक्तवती तेनोक्तं नारदाय वै |
नारदः प्रोक्तवान्मह्यं तदेतत्प्रोक्तवानहं ||20||

एवं परंपराप्राप्तं सर्वशास्त्रार्थ संग्रहं |
तुलसीकवचं पुण्यं तस्मात्स्तोत्रं महात्फलं ||21||

तस्मात्कोटिगुणं पुण्यं तुलसीस्तवराजतः |
पुत्रार्थी पुत्रमाप्नोति राज्यार्थी राज्यमाप्नुयात् ||22||

किं तेन बहुनोक्तेन मोक्षार्थी मोक्षामाप्नुयात्त् |
सप्तद्वीपवतीं पृथ्वीं दत्वा यत्फलमाप्नुयात् |
तत्फलं समवाप्नोति तुलसीपत्रदानतः ||23||

इति ब्रह्मपुराणांतर्गतः तुलसीस्तवराजः संपूर्णः |